र्षिपितृजादृणात् । साध्यस्थ्यमाश्रयेत् गेही सुते विश्वग्विसृज्य च । गृहेऽपि ज्ञानमभ्यस्येत्काशीं वाथ समाश्रयेत् । सम्यग्ज्ञानेन वा मुक्तिः किं न विश्वेशवेश्मनि ? । सम्यग्ज्ञानं भवेत् पुंसां कुत एकेन जन्मना ? । वाराणस्यां ध्रुवा मुक्तिः शरीरत्यागमात्रतः । अद्यश्वोवा परश्वोवा कालाद्वाथ पर:शतात् । सत्वरं गत्वरो देहः काश्यां चेदन्तगती भवेत् । सा च वाराणसी लभ्या सदाचारवता सता । मनसापि सदाचारमतो विद्वान्न लङ्घयेत्” । वसिष्ठस्मृतौ च “आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः । छन्दांस्येनं मृत्युकाले त्यजन्ति नीड़ं शकुन्ताइव जातपक्षाः । आचारहीनस्य तु ब्राह्मणस्य वेदाः षड़ङ्गाश्चखिलाः सपक्षाः । कां प्रीतिमुत्पादयितुं समर्थाश्चन्धस्य दारा इव दर्शनीयाः । नैनं छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्त्तमानम् । तत्त्वाक्षरे सम्यगधीयमाने पुनाति तद्ब्रह्म यथावदिष्टम् । दुराचारोहि पुरुषोलोके भवति निन्दितः । दुःखभागी च सततं व्याधितोऽल्पायुरेव च । आचारात् फलते धर्म्ममाचारात् फलते धनम् । आचारात् श्रियमाप्नोति आचारोहन्त्यलक्षणम् । सर्व्वलक्षणहीनोऽपि यः सदाचारवान्नरः । श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति । आहारनिर्हारविहारयोगाः सुसंवृता धर्म्मविदा तु कार्य्याः । वाग्बुद्धिवीर्य्याणि तपस्तथैव धनायुषी गुप्ततमे च कार्य्ये । उभे मूत्रपुरीषे तु दिवा कुर्य्यादुदङ्मुखः । रात्रौ कुर्य्याद्दक्षिणास्य एवं ह्यायुर्न रिष्यते । प्रत्यग्निं प्रतिसूर्यञ्च प्रति गां प्रति च द्विजम् । प्रतिसोमोदकं सन्ध्यां प्रज्ञा नश्यति मेहतः । न नद्यां मेहनं कार्य्यं न पथि न च भस्मनि । न गोमये नवा कृष्टे नोप्ते क्षेत्रे न शाड्वले । छायायामन्धकारे वा रात्रावहनि वा द्विजः । यथासुखमुखः कुर्य्यात् प्राणबाधाभयेषु च । उद्धृताभिरद्भिः कार्य्यं कुर्य्यान्न स्नानमनुद्धृताभिरपि । न हरेन्मृत्तिकां विप्रः कूलात् ससिकतां तथा । अन्तर्जले देवगृहे वल्मीके मूषिकस्थले । कृतशौचावशिष्टे च न ग्राह्याः पञ्च मृत्तिकाः । एका लिङ्गे करे तिस्रउभाभ्यां द्वे तु मृत्तिके । पञ्चापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः । एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः । वानप्रस्थस्य त्रिगुणं यतीनान्तु चतुर्गुणम् । अष्टौ ग्रासा मुनेर्भक्तं वानप्रस्थस्य षोड़श । द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः । अनड्वान् ब्रह्मचारी च आहिताग्निश्च ते त्रयः । भुञ्जानाएव सिध्यन्ति नैषां सिद्धिरनश्नताम् । तपोदानोपहारेषु व्रतेषु नियमेषु च । इज्याध्ययनधर्म्मेषु योन शक्तः स निष्क्रियः । योगस्तपोदमोदानं सत्यं शौचं दया श्रुतम् । विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् । सर्वत्र दान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिबधे निवृत्ताः । प्रतिग्रहे सङ्कुचिता गृहस्थास्ते ब्राह्मणास्तारयितुं समर्थाः । असूयुः पिशुनश्चैव कृतघ्नो दीर्घरोषकः । चत्वारः कर्म्मचाण्डाला जन्मतश्चापि पञ्चमः । दीर्घवैरमसूयाञ्च असत्यं ब्रह्मदूषणम् । पैशुन्यं निर्द्दयत्वञ्च जानीयाच्छूद्रलक्षणम् । किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम् । पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे । शूद्रान्नरसपुष्टाङ्गोह्यधीयानोऽपि नित्यशः । हुत्वापि च जपित्वापि गतिमूर्द्ध्वां न विन्दति । शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः । स भवेच्छूकरोग्राम्यस्तस्य वा जायते कुले । शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति । यस्यान्नं तस्य ते पुत्रा नच स्वर्गार्हकोभवेत् । स्वाध्यायाढ्यं योनिमित्रं प्रशान्तं चैतन्यस्थं पापभीरुं बहुज्ञम् । स्त्रीयुक्तान्नं धार्म्मिकं गोशरण्यं व्रतैः क्षान्तं तादृशं पात्रमाहुः । आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु । विनश्येत् पात्रदौर्बल्यात्तच्च पात्रं रसाश्च ते । एवं गाञ्च हिरण्यञ्च वस्त्रमश्वं महीं तिलान् । अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवत् । नाङ्गनखञ्च वादित्रं कुर्य्यात् नचापोऽञ्जलिना पिवेत् । न पादेन पाणिना वा राजानमपि हन्यात् न जलेन जलम् । नेष्टकाभिः फलानि पातयेत् न फलेन फलम् । न कल्कपुटकोभवेत् । नम्लेच्छभाषां शिक्षेत । अथाप्युदाहरन्ति । न पाणिपादचपलो न नेत्रचपलोभवेत् । नचाङ्गचपलोविप्र इति शिष्टस्य गोचरः । पारम्पर्य्यागतोयेषां वेदः सपरिवृंहणः । ते शिष्टा ब्राह्मणाज्ञेयाः श्रुतिप्रत्यक्षहेतवः । यन्न सन्तं नचासन्तं नाश्रुतं न बहुश्रुतम् । न सुवृत्तं न दुर्वृत्तं वेद कश्चित् स ब्राह्मण” एवंमन्वादिसंहितादौ बहव आचारा उक्तप्रायाः दर्शिताः । भावापरपर्य्यायः तन्त्रोक्ताचारस्तु दिव्याचारवीराचारपश्वाचारभेदात् त्रिविधः यथोक्तं तन्त्रसारे ।

“अथ भावविधिं वक्ष्ये शृणुष्व कमलानने ! । विना येन न सिध्येत्तु जन्मकोटिशतैरपि । भावस्तु त्रिविधो देवि ! दिव्यवीरपशुक्रमात् । दिव्यवीरौ महाभावौ अधमः पशुभावकः । वैष्णवः पशुभावेन पूजयेत् परमेश्वरम् । शक्तिमन्त्रे वरारोहे ! पशुभावो भयानकः । दिव्ये वीरे-